# Kailaseshvarapradoshapujavarnanam 2

# कैलासेश्वरप्रदोषपूजावर्णनम् २

## Document Information

Text title : Kailaseshvarapradoshapujavarnanam 2

File name : kailAseshvarapradoShapUjAvarNanam2.itx

Category : shiva, shivarahasya, pUjA

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 13 - kailAseshvarapradoShapUjAvarNanam | 25-32||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

Kailaseshvarapradoshapujavarnanam 2

# कैलासेश्वरप्रदोषपूजावर्णनम् २

(ईश्वरप्रोक्ता पञ्चमुखेश्वरलिङ्गस्तुतिः २)

ईश्वरः -
प्रालेयाचलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यङ्गमनङ्गदेहदहनज्वालावलीलोचनम् ।
विष्णुब्रह्ममरुद्गणार्चितपदं ऋग्वेदनादोदयं
वन्देऽहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ॥ २५॥

गौरं कुङ्कुमपङ्किलं सुतिलकं व्यापाण्डुगण्डस्थलं
भ्रूविक्षेपकटाक्षवीक्षणलसत्संस्रस्तकर्णोत्पलम् ।
स्निग्धं बिम्बफलाधरं प्रहसितं नीलालकालङ्कृतं
वन्दे याजुषवेदनादजनकं वक्त्रं हरस्योत्तरम् ॥ २६॥

बालार्काग्नितटित्प्रदीतकनकमस्पर्धितेजोरुणं
गम्भीरध्वनिसामवेदजनकं ताम्राधरं सुन्दरम् ।
अर्धेन्दुद्युतिलोलपिङ्गलजटाभारप्रबद्धोरगं
वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलिनः ॥ २७॥

कालाभ्रभ्रमराञ्जनद्युतिनिभं व्यावृत्तपिङ्गेक्षणं
कर्णोद्भासितभोगिमस्तकमणिप्रोद्भिन्नदंष्ट्राङ्कुरम् ।
सर्पप्रोतकपालशुक्तिशकलं व्याकीर्णमाशेखरं
वन्दे दक्षिणमीश्वरस्य वदनं चाथर्वनादोदयम् ॥ २८॥

व्यक्ताव्यक्तनिरूपितञ्च परमं शुद्धांशसत्वाधिकं
तस्मादुत्तरतत्वमक्षरमिदं ध्येयं सदा योगिभिः ।
ओङ्कारादिसमस्तमन्त्रजनकं सूक्ष्मातिसूक्ष्मं परं
ध्यायेत्पञ्चममीश्वरस्य वदनं खव्यापि तेजोमयम् ॥ २९॥

(फलम्)-

एतानि पञ्चवदनानि महेश्वरस्य ये कीर्तयन्ति मनुजास्सततं प्रभाते ।
गच्छन्ति ते शिवपदं रुचिरैर्विमानैः क्रीडन्ति शङ्करगणैस्सततं शिवाग्रे ॥ ३०॥

- -
इत्युक्त्वा निरगात्ततो सुरसरितीरात्तदान्दोलिरतै-
र्हारैस्तैर्भुजगेश्वरप्रकलितै रत्नाच्छसत्पादुकः ।
कैलासेश्वरधाम सुन्दरमहानन्दैकसारास्पदं
दृष्ट्वा लिङ्गवरं प्रदोषसमये सम्पूज्य पूजाभरैः ॥ ३१॥

श्रीविश्वेश्वर उग्र उग्रतनुजारातिप्रियश्शङ्कर-
श्श्रीकण्ठः कलुषाद्रिपक्षदलनस्वाराडसङ्गश्शिवः ।
प्राहोत्फुल्लसुरक्तपङ्कजलसद्वक्त्रो भवानीं हरः
पश्येति प्रसभं मदीयमहिमारम्भैकपूजाभरम् ॥ ३२॥

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये कैलासेश्वरप्रदोषपूजावर्णने ईश्वरप्रोक्ता पञ्चमुखेश्वरलिङ्गस्तुतिः ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः १३ - कैलासेश्वरप्रदोषपूजावर्णनम् । २५-३२॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 13 - kailAseshvarapradoShapUjAvarNanam . 25-32..

Notes:
Śiva शिव outlines to devI; the eulogy to Pañcamukheśvaraliṅga पञ्चमुखेश्वरलिङ्ग, that forms a part of the Kailāśeśvara Pradoṣa Pūjā कैलाशेश्वर प्रदोष पूजा.
Four of the Five Faces are indicative of the four cardinal directions and are described as the Origin of the Sounds (Nāda नाद, Ghoṣa घोष) of the Four Veda-s; viz. West Face Sthāṇu स्थाणु of Ṛgveda ऋग्वेद, North Face Hara hara of Yajurveda यजुर्वेद, East Face Śūlina शूलिन of Sāmaveda सामवेद, and South Face Īshvara ईश्वर of Atharveda अथर्ववेद.
The Fifth Face is directed towards / permeates the Sky (Khavyāpī खव्यापी), is the origin of Oṃkāra etc. all mantra-s ॐकारादि समस्त मन्त्र, and is Luminous (Tejomayam तेजोमयम्).
Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) शिवरहस्यम् अंशः-१ (माहेश्वराख्य) has several descriptions about Mount Kailāsa कैलास शैल and Śiva शिव. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

*Kailaseshvarapradoshapujavarnanam 2*
pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*